यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥' ज्ञीरिष्टचोऽश्वत्थादि:। ततो धेनुं सचेलकण्ठां कांस्याद्युक्तविशेषणयुक्तां जलाशयेऽवतारयेत्। तथा हयशीर्षपञ्चरात्रे।
'गां सवत्सां समानीय सुशीलाञ्च पयस्विनीम्।
कांस्योपदोहां घण्टादिवस्त्रपुष्पोपशोभिताम्।
स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सुशोभनाम् ॥
लाङ्गूलन्यस्तहस्तोऽसौ यजमान: सबान्धव:।
शनै: सन्तारयित्वा तामाचार्य्याय निवेदयेत् ॥'
कांस्योपदोहां कांस्यक्रोड़ामिति यावत्। कापिले।
'अजले जलमुत्पाद्य यजमान: सभार्य्यक:।
तरेद्वै प्राङ्मुखो भूत्वा कृतगोलाङ्गूलाङ्गुलि: ॥'
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणा-मनुमन्त्रयेत्। तत: प्राङ्मुख: सन्नवतारयेत्। सा च गौ: पश्चिमतोऽवतार्य्या। तत: कूल-समीपं गत्वा तर्पयेत्। यथा कापिलम्।
'पुन: पुच्छोदकेनाथ सतिलेन कुशेन तु।
भुग्नेनैवापसव्येन पितृतीर्थेन तर्पयेत् ॥
गतास्त्वागमिष्यन्ति ये कुले मम बान्धवा:।
ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै।
ततो सुपामि मन्त्रेण सुचेन्नां वत्ससंयुताम् ॥'
आचार्य्यैर्गान्वारब्ध उत्तीर्य्य आपोऽस्मान्मातर: शुन्धयन्त्वितिमन्त्रेण ऐशान्यामुत्थापयेत्। सुय-वसा भगवतीह भूया इति ब्रूयात्। सा यदि हिंकारं करोति तदा हिं कृण्वतीत्यादि जपेत्। तत उक्तविशेषणयुक्तां धेनुमाचार्य्याय सामगाय दद्यात्। ततो यथाशक्ति दक्षिणाञ्च दद्यात्। एतत्पर्य्यन्तं न कूपे यवच्छ्रियतेऽसम्भवात् ॥*॥ तत उत्सर्गं कुर्य्यात्। अत्र विशेषमाह रत्ना-करधृतमत्स्यपुराणम्।
'फलान्याचिन्त्य मनसा विविधानि शुभानि च।
प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाशयम् ॥'
कापिलञ्च।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थित:।
जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं ध्रुवम् ॥'
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम्। सर्व्वभूतेभ्य उत्सृजेदित्यर्थ:। देवपितृमानुष्या: प्रीयन्ता-मिति पठेदिति शेष:। उत्सृज्य यजमानो ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति शेष:। एतत्पर्य्यन्तं कूपेऽपि। जलाशयोत्सर्गस्य सर्व्वभूतोद्देश्यकत्वेन अपकृष्टचेतनोद्देश्यकत्वेऽपि त्यागत्वमपि। ततश्च कीटादेर्ममेदमिति स्वीका-रायोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वाजनकत्यागरू-पत्वात् अस्य यागत्वम्। अतएव जलाशयोत्-सर्गमुपक्रम्य मत्स्यपुराणेऽपि। प्राप्नोति तद्-यागबलेन भूय इति यागत्वेनाभिहितम्। ततश्च तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधा-रणीकृतम्। अतएव
'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम्।
रमन्तु सर्व्वभूतानि स्नानपानावगाहनै: ॥'
इति मन्त्रलिङ्गेन उपादानं विना कस्यापि न स्वत्वमिति। ततश्चास्य यागवदुत्तराप्रतिपत्तेर-श्रुतत्वात् साधारणजनस्य परिग्रहमात्रेण गौत-मोक्तेन स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात् तत्र स्नानादावदोष इति तत्त्वम्। यथा गौतम:। स्वामी रिक्थक्रयसंविभाग-परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रि-यस्य विजितं निर्द्दिष्टं वैश्यशूद्रयोरिति। परि-ग्रहोऽनन्यपूर्व्वस्य जलतृणकाष्ठादे: स्वीकार इति मिताक्षरा। ऋक्थाधिकारे यज्ञमाहा-पस्तम्ब:। दायाद्यं शिलोञ्छौ चान्यच्चापरि-गृहीतमिति। अपरिगृहीतमन्यास्वीकृतमस्वा-मिकमिति यावत्। निर्व्विष्टं वेतनलब्धं निर्वेशो भृतिभोगयोरित्यमरकोषत्रिकाण्डशेषयो: ॥ हयशीर्षे।
'आपोहिष्ठेति तिसृभि: पञ्चगव्यं विनि:क्षिपेत्।
तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजै: कृतम् ॥
गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा।
ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम् ॥'
एतत्पर्य्यन्तं कूपेऽपि ॥ * ॥ कापिले।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक्।
तत: कुम्भे च नि:क्षिप्य गायत्र्या च विलोड्य वै ॥
उद्धरेत् पत्रिकामेकां तत्रैव नागमीरयेत्।
यस्य नामोद्धरेद्यत्तु स वै जलाधिप: स्मृत: ॥
तञ्च संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम् ॥'
पत्रगाणामस्य योगीश्वरधृतवचनाद्यथा।
'अष्टौ नामान्याम्रपत्रे कृत्वा दैव प्रयत्नत: ॥'
तानि च गारुड़े।
'अनन्तो वासुकि: पद्मो महापद्मोऽथ तक्षक:।
कुलीर: कर्कट: शङ्खो ह्यष्टौ नागा: प्रकीर्त्तिता: ॥'
एतानि नामानि आम्रपत्रे लिखित्वा कलस-मध्ये नि:क्षिप्य गायत्र्या छन्दसा मथामि इति रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं यष्ट्यां समावाह्यानेन नागेनास्य जलस्य रक्षा कर्त्तव्या इति ब्राह्मणान् श्रावयेत्। हयशीर्षे।
'वैणुकं वारुणञ्चैव पुन्नागं नागकेशरम्।
वकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टि: प्रकीर्त्तिता।
सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्याद्यथेप्सितम् ॥'
तथा च बृहस्पति:।
'शूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाशये।
द्वादशाङ्गुलमानन्तु वापीचक्रं प्रकल्पयेत् ॥
षोड़शं पुष्करिण्यान्तु विंशतिश्च सरोवरे।
सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम् ॥
चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम्।
शतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि ॥
त्रिगुणन्तु सरोमानमत ऊर्द्ध्वन्तु सागर: ॥'
ततो द्वादशपञ्चदशविंशत्येकविंशत्यन्यतमकनि-ष्ठाङ्गुल्यवच्छिन्नहस्तप्रमाणां यष्टिं वक्ष्यमाण-मन्त्रेण स्थापयेत्। ॐ गन्धद्वारेति गन्धवारिणा ॐ भद्रं कर्णेभिरिति तैलहरिद्रया ॐ काण्डात् काण्डादिति दूर्व्वाभि: ॐ द्रुपदादिव इत्यादिना सप्तमृत्तिकादिभि: ॐ मधुवातेति पञ्चामृतेन ॐ या: फलिनीरिति फलोदकेन ॐ युवासुवासा इति क्षुद्रघण्टिकायुतां पताकां यष्ट्यां बध्नीयात्। ॐ यष्ट्यै नम: इतिमन्त्रेण पूजयेत्। पुष्पाद्यल-ङ्कृतां यष्टिं कन्दरसमीपं नयेत्। गुरुस्तु शङ्खादि-नि:स्वने राजतवरुणप्रतिमां उत्तिष्ठेति समुत्थाय प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना मन्त्रेण वरुणस्योत्तम्भनमसि इतिमन्त्रेण च जले क्षिपेत्। ततस्तत्रैव स्वाति शाड्वलगोमय-दधिमधुकुशमहानदीजलपञ्चरत्नानि ॐ येते-वापी रोचने दिव इतिमन्त्रेण क्षिपेत्। ॐ ध्रुवं ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ यूपस्येतिमन्त्रेण जलमध्ये आरोपयेत्। ततो जलमातृ: पूजयेत्। यथा ह्रीं पूर्व्वस्याम्। श्रियं आग्नेय्याम्। शचीं दक्षिणस्याम्। मेधां नैरृत्याम्। श्रद्धां पश्चिमायाम्। विद्यां वाय-व्याम्। लक्ष्मीं उत्तरस्याम्। सरस्वतीं ऐशा-न्याम्। अधो विद्याम्। ऊर्द्ध्वे लक्ष्मीम्। माद्या-दिभि: संपूज्य अग्निं प्रदक्षिणीकृत्य सूर्य्यादि-द्वात्रिंशद्देवता: पूजयेत्। चमस्वेति वरुणं क्षामयेत्। कापिलम्।
'शक्तूर्य्यादिनिनदैस्तथा वै क्षीरधारया ॥'
जलाशयं प्रवेश्येदिति शेष:। प्रतिष्ठानन्तरं मात्स्ये।
तत: सहस्रं विप्राणामथवाष्टशतन्तथा।
भोजयेच्च यथाशक्त्या पञ्चाशदाथ विंशतिम् ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

पुष्करी, [न्] पुं, (पुष्करमस्यास्तीति। पुष्कर+ इनि:।) हस्ती। इति त्रिकाण्डशेष: ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति। पुष + "कलंश्च।" उणा० ४। ५। इति कलन् स च कित्।) ग्रासचतुष्टयात्मकभिक्षा। यथा,—
"भिक्षामाहुर्ग्रासमात्रमन्नं तस्माच्चतुर्गुणम्।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥"
इति कौर्म्मे उपविभागे १७ अध्याय: ॥
अष्टकुञ्चिपरिमाणम्। यथा, प्रायश्चित्ततत्त्वे।
"अष्टमुष्टिर्भवेत् कुञ्चि: कुञ्चयोऽष्टौ च पुष्कलम्।
पुष्कलानि च चत्वारि आढ़क: परिकीर्त्तित: ॥"
(नगरविशेष:। यथा, रामायणे। ७।११४।११।
"इतेषु तेषु सर्व्वेषु भरत: कैकयीसुत:।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे ॥
तक्षं तक्षशिलायान्तु पुष्कलं पुष्कलावते।
गन्धर्व्वदेशे रुचिरे गान्धारविषये च स: ॥")

पुष्कल:, त्रि, (पुष्कं महत्त्वं लातीति। ला + क:। यद्वा, पुष्कं पुष्टिर्महत्त्वमिति यावत् तदस्य-स्येति। पुष्क + "सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) श्रेष्ठ:। इत्यमर:। ३। १। ५८ ॥ बहु:। इति हेमचन्द्र: ॥ (यथा, महा-भारते। ३। ३। १०।
"राजानो हि महात्मानो योनिकर्म्मविशो-धिता:।
उद्धरन्ति प्रजा: सर्व्वास्तप आस्थाय पुष्कलम् ॥")
उपस्थित:। इति जटाधर: ॥